आदौ-मुख्यवार्ताः

· राज्यसभायां पञ्चविंशत्युत्तर-द्विसहस्त्रतमस्य वक्फ-संशोधन-विधेयकस्योपरि चर्चा जायमाना वर्तते।

· भारतनथाईलैण्डदेशाभ्यां सूचना-प्रौद्योगिकी- समुद्रीयम्- एम.एस.एम.ई.- हस्तशिल्पम्- हस्तवयनम् चेत्यादिषु विविधक्षेत्रेषु सहकार्यस्य षट्सन्धयः कृताः।

· सर्वोच्चन्यायालयेन पश्चिमबङ्गविद्यालयेषु पंचविंशतिसहस्रतोऽप्यधिकानां शिक्षकाणाम् अथ अन्यकर्मचारिणां नियुक्तिः निरस्तीकृता ।

· वित्तराज्यमन्त्री पंकजचौधरी अद्य उक्तवान् यत् भारतसहितस्य अनेकदेशेषु अमेरिका-देशेन कृतस्य षड्विंशतिः प्रतिशतं पारस्परिकशुल्कारोपण-प्रभावस्य विश्लेषणं मूल्याङ्कनं च भविष्यति।

· अपि च

· आई-पि.एल् विंशतिं-प्रतिविंशतिः क्रिकेट् क्रीडायाम् अद्य रात्रौ कोल्कत्तायाः ईडन्-गार्डन् क्रीडांगणे कोलकाता-नाईट्-राईडर्स् -दलं सन्-राइजर्स-हैदराबाद-दलं विरुद्ध्य प्रतिस्पर्धिष्यति ।

अथ वार्ताः विस्तरेण

राज्यसभा- वक्फ-संशोधन-विधेयकम्

राज्यसभया पञ्चविंशत्युत्तर-द्विसहस्त्रतमं वक्फ-संशोधन-विधेयकं विचारार्थं स्वीकृतम् , अस्य मुख्योद्देश्यं वक्फ-सम्पत्तीनां प्रबन्धनं सुव्यवस्थितया भवेदित्यस्ति। अस्मिन् विधेयके पारम्परिकस्थलानां संरक्षणम्, सामाजिक-कल्याणस्य समेधनमित्यादीनि प्रावधानानि सन्ति। सहैव सम्पत्तिप्रबन्धने पारदर्शितां समेध्य वक्फपरिषदि स्थानीयाधिकारिषु च समन्वयं संस्थाप्य शासन-व्यवस्थायाः परिष्कारः इति वर्तते।

विधेयकेऽस्मिन् विशेषतः मुस्लिम-महिलानाम्,तत्रापि विधवा-महिलानां एवं विच्छेदितानां, आर्थिक-सामाजिकस्थितावपि परिष्कारार्थं प्रयासः कृतो विद्यते ।

अल्पसंख्यककार्य-मन्त्रिणा किरेण रिजिजू इत्यमुना विधेयकस्यास्य प्रकाशनसमये प्रोक्तं यत् विधेयकमिदं हितधारकैः, संयुक्तसंसदीय-समित्या च सह विस्तृत-विचारविमर्शानन्तरं आनीतमस्ति। तेन विपक्षी-दलानि विधेयकस्यास्य समर्थनार्थं सम्प्रार्थितानि। विपक्षिणाम् आक्षेपान् निराकुर्वन् सः प्रोक्तवान् यत् अस्य विधेयकस्योद्देश्यं वक्फ-संपत्तीनाम् सुव्यवस्थित-प्रबन्धनं वर्तते न तु मुस्लिमजनानां धार्मिकास्थायां हस्तक्षेपः वर्तते इति।

प्रधानमन्त्री- थाईलैण्ड यात्रा

भारतेन थाईलैण्डेन च अद्य सूचना-प्रौद्योगिकी , समुद्रीयम्, एम.एस.एम.ई., हस्तशिल्पम्, हस्तवयनम् च इत्यादिषु विविधक्षेत्रेषु सहकार्यस्य षट्सन्धयः कृताः। अद्य

अपराह्णे बैंकॉक्-नगरे प्रधानमन्त्री नरेन्द्रमोदी-थाई-समकक्षा- पेटोङ्गटार्न् –शिनावात्रा इत्यनयोः मध्ये द्विपक्षीयवार्तायाः अनन्तरं एतेषां सन्धीनाम् आदानप्रदानं कृतम्। उभयपक्षेण द्विपक्षीयसम्बन्धानां सम्पूर्णपरिधीय-प्रगतेः समीक्षा कृता, भारत-थाईलैण्ड्-द्विपक्षीय-सहभागित्वस्य वृद्धौ अधिकां गतिं योजयितुं उपायानां चर्चा कृता, क्षेत्रीयबहुपक्षीयविषयेषु विचाराणां आदानप्रदानं च कृतम्। प्रधानमन्त्रिणा श्रीमोदिना तत्र गौरवसम्मानादिकं प्राप्तम्। द्विपक्षीयवार्तायाः अनन्तरं स्वस्य संयुक्तवक्तव्ये प्रधानमन्त्री मोदी भारत-थाईलैण्ड्-सम्बन्धं सामरिक-सहभागित्व-रूपेण उन्नतीकरणस्य निर्णयस्य घोषणां कृतवान्। भारतस्य 'एक्ट ईस्ट्' इति नीतौ भारत-प्रशांत-दृष्टौ च थाईलैण्ड्-देशस्य विशेषं स्थानं वर्तते इति सः रेखांकितवान्।

श्रीमोदी अवदत् यत् ते उभयराष्ट्रानां सुरक्षासंस्थानां मध्ये 'रणनीतिकसंवादस्य' स्थापनायाः विषये चर्चां कृतवन्तः।

श्रीमोदी अवदत् यत् वार्तायां द्वाभ्यामपि पक्षाभ्यां पूर्वोत्तरभारतस्य थाईलैण्डस्य च पर्यटनस्य, संस्कृतेः, शिक्षायाः च क्षेत्रेषु सहकार्यस्य उपरि बलं दत्तम्। उभौ नेतारौ व्यावसायिकानां मध्ये परस्परव्यापारं, निवेशं, आदानप्रदानं च वर्धयितुं चर्चां कृतवन्तौ। प्रधानमन्त्री श्रीमोदी उक्तवान् यत् एमएसएमई, हस्तवयनेषु, हस्तशिल्पेषु च सहकार्यार्थं सन्धयः कृताः । प्रधानमन्त्रिणा विस्तरेण उक्तं यत् भारतस्य थाईलैण्डस्य च शताब्दपुरातनाः सम्बन्धाः, गहनैः सांस्कृतिकैः आध्यात्मिकसूत्रैश्च सम्बद्धाः सन्ति। सः अवदत् यत् बौद्धधर्मस्य प्रसारः द्वयोः राष्ट्रयोः जनानां मध्ये सम्बन्धमकल्पयत् अथ, अयुत्थायातः नालंदापर्यन्तं विदुषानाम् आदानप्रदानं जातम्। श्रीमोदी सबलं प्रतिपादितवान् यत् रामायणस्य कथा थाई लोकजीवने गभीररूपेण निहितः अस्ति, अथ अद्यत्वे भाषासु परम्परासु च संस्कृत-पाली-भाषायाः प्रभावः दृश्यते ।

श्रीमोदी भारतस्य नागरिकाणां पक्षतः भूकम्पे प्राणाहुतानां प्रति शोकसंवेदनां प्रकटितवान्, आहतानाम् शीघ्र-स्वास्थ्यस्य च कामनाम् अकरोत्। अवधेयमस्ति यत् प्रधानमन्त्री श्रीमोदी श्वः भविष्यमाणस्य षष्ठे बिम्स्टेक् शिखरसम्मेलने भागं ग्रहीतुं थाईलैण्ड्देशस्य द्विदिनयात्रायां अस्ति।

सर्वोच्च न्यायालय

सर्वोच्चन्यायालयेन अद्य कलकत्ता उच्चन्यायालयस्य निर्णयस्य समर्थनं कृतम् यत् पश्चिमबङ्गविद्यालयेषु पंचविंशतिसहस्रतोऽप्यधिकानां शिक्षकाणाम् अथ अन्यकर्मचारिणां नियुक्तिः निरस्तीकृता। शीर्षन्यायालयेन उक्तं यत् सम्पूर्णा चयनप्रक्रिया भ्रमसहितं, वंचनापूर्वकम् अस्ति तथा च तस्याः विश्वसनीयता वैधता च नग्नीकृता । भारतस्य मुख्यन्यायाधीशेन संजीवखन्नावर्येण, न्यायाधीशेन संजयकुमारेण च समाविष्टपीठेन प्रोक्तं यत् पश्चिमबङ्गस्य विद्यालयेषु नूतनचयनप्रक्रिया मासत्रयाभ्यन्तरं सम्पन्नं भविष्यति ।

अमेरिका- टैरिफ

वित्तराज्यमन्त्री पंकजचौधरी अद्य उक्तवान् यत् भारतसहितस्य अनेकदेशेषु षड्विंशतिः प्रतिशतं पारस्परिकशुल्कारोपणस्य राष्ट्रपतेः डोनाल्ड-ट्रम्पस्य निर्णयस्य प्रभावस्य विश्लेषणं मूल्याङ्कनं च भविष्यति। तेनोक्तं यत् अस्य कृते सर्वकारः उपायान् च निर्धारयिष्यति। श्री-चौधरी नवदिल्ल्यां 'प्रथम-अन्ताराष्ट्रिय-पेंशन अनुसंधान सम्मेलनम् ' इत्यस्य उद्घाटन-सत्रे संवाददातृभिः सह वार्तालापं कृतवान्। सः उक्तवान् यत् डोनाल्ड-ट्रंपस्य कृते इयं 'अमेरीका-प्रथम' नीतिः वर्तते तत्रैव हि प्रधानमन्त्रिणः श्रीनरेन्द्र-मोदिनः कृते 'भारत-प्रथमम्' अस्ति।

वित्तमन्त्रालयः- वित्त-अधिनियमः

वित्तमन्त्रालयेन अष्टादशोत्तर-द्विसहस्रतमे सर्वकारीय-सञ्चय-प्रवर्धनसामान्यनियमे संशोधनस्य अधिसूचना प्रख्यापिता। अस्यान्तर्गतं पी.पी.एफ. इति सार्वजनिकभविष्यनिधि-कोषानां कृते नामाङ्कने कस्यापि परिवर्तनस्य शुल्कं निष्कासितम् अस्ति। वित्तमन्त्री निर्मला सीतारमणः अद्य सामाजिक-सञ्जालीय-माध्यमे अवदत् यत् राजपत्रसूचनाद्वारा उक्त-सर्वकारीय-सञ्चय-प्रवर्धन-सामान्यनियमे आवश्यक-परिवर्तनं कृतम्। अधिसूचनानुनुसारं नामित-व्यक्तेः नाम-निरस्तीकरणस्य अथवा परिवर्तनस्य कृते पञ्चाशत्-रूप्यकाणां शुल्कस्य निरस्तीकरणं कृतमस्ति। अवधेयं यत् इदं संशोधनं अप्रैल-मासस्य द्वितीयदिनांकात् क्रियान्वितमस्ति।

वक्फविधेयक-महिलाः

पञ्चविंशत्युत्तर-द्विसहस्त्रतमस्य वक्फ-संशोधन-विधेयकस्य मुख्योद्देश्यं मुस्लिममहिलाभ्यः सम्पत्तौ उचितविभागः, वित्तीयसाहाय्यप्रदानं सहैव वक्फसम्पत्ति-प्रबन्धने तासां दृढभूमिका भवेदित्यस्ति। विधेयकमिदं वक्फप्रशासने मुस्लिममहिलानां निर्णयग्रहणशक्तिमपि सुनिश्चिनोति। एतत् विधेयकं निर्धारयति यत् संपत्तेः वक्फपरिषदि समर्पणात्प्राक् महिलोत्तराधिकारिणः तासामधिकारं पूर्णतया प्राप्नुयुः। पञ्चविंशत्युत्तर-द्विसहस्त्रतमं वक्फ-संशोधन-विधेयकं वक्फसमितेः सामाजिककल्याणस्य न्यायस्य च साधनत्वेन निर्मातुं बृहत्पदक्षेपः वर्तते। अस्य विधेयकस्य उद्देश्यं तावत् उत्तराधिकाराधिकारान् संरक्ष्य, विधवाभ्यः, विच्छेदिताभ्यः महिलाभ्यः साहाय्यं प्रदाय, शासने महिलानां भूमिकायाः संवर्धनं भवेदित्यस्ति।

आईपीएल् क्रिकेट प्रतिस्पर्धा

आई-पि.एल् विंशतिं-प्रतिविंशतिः क्रिकेट् क्रीडायाम् अद्य रात्रौ कोल्कतायाः ईडन्-गार्डन् क्रीडांगणे कोलकाता-नाईट्-राईडर्स् -दलं सन्-राइजर्स-हैदराबाद-दलं विरुद्ध्य प्रतिस्पर्धिष्यति। क्रिकेट्द्वन्द्वं अद्य सायं सार्धसप्तवादने आरप्स्यते। गतरात्रौ, बेंगलूरु नगरस्य चिन्नस्वामि-क्रीडांगणे गुजरात्-टाइटान्स्-दलेन रोयल् -चालेंजर्स्-बेंगलूरुदलं अष्टस्तोभैः पराजितम् ।

।। इति वार्ताः ।।--------------------------------